# Andhakakritam Shiva Stotram

# अन्धककृतं शिवस्तोत्रम्

## Document Information

Text title : Andhakakritam Shiva Stotram

File name : shivastotramandhakakRRitaM.itx

Category : shiva, stotra

Location : doc_shiva

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description/comments : From Saurapurana

Latest update : December 11, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 11, 2021

*sanskritdocuments.org*

# अन्धककृतं शिवस्तोत्रम्

(सौरपुराणे २९-अध्यायान्तर्गतम्)

अन्धक उवाच-
नमामि मूर्ध्ना भगवन्तमेकं समाहिता यं विदुरीशतत्त्वम् ।
पुरातनं पुण्यमनन्तरूपं कालं कविं योगवियोगहेतुम् ॥ २८॥

दंष्ट्राकरालं दिवि नृत्यमानं हुताशवक्त्रं ज्वलनार्करूपम् ।
सहस्रपादाक्षिशिरोभियुक्तं भवन्तमेकं प्रणमामि रुद्रम् ॥ २९॥

जयादिदेवामरपूजिताङ्घ्रे विभागहीनामलतत्त्वरूपम् ।
त्वमग्निरेको बहुधा विभज्यसे वाय्वादिभेदैरखिलात्मरूपः ॥ ३०॥

त्वामेकमाहुः पुरुषं पुराणमादित्यवर्णं तमसः परस्तात् ।
त्वं पश्यसीदं परिपाल्यजस्रं त्वमन्तको योगिगणाभिजुष्टः ॥ ३१॥

एकान्तरात्मा बहुधा निविष्टो देहेषु देहादिविशेषहीनः ।
त्वमात्मतत्त्वं परमार्थशब्दं भवन्तमाहुः शिवमेव केचित् ॥ ३२॥

त्वमक्षरं ब्रह्म परं पवित्रमानन्दरूपं प्रणवाभिधानम् ।
त्वमीश्वरो वेदविदेषु सिद्धः स्वायम्भुवोऽशेषविशेषहीनः ॥ ३३॥

त्वमिन्द्ररूपो वरुणोऽग्निरूपो हंसः प्राणो मृत्युरन्नाधियज्ञः ।
प्रजापतिर्भगवानेकरूपो नीलग्रीव स्तूयसे वेदविद्भिः ॥ ३४॥

नारायणस्त्वं जगतामनादिः पितामहस्त्वं प्रपितामहश्च ।
वेदान्तगुह्योपनिषत्सु गीतः सदाशिवस्त्वं परमेश्वरोऽसि ॥ ३५॥

नमः परस्तात्तमसः परस्मै परात्मने पञ्चपरान्तराय ॥

त्रिमूर्त्यतीताय निरञ्जनाय सहस्रशक्त्यासनसंस्थिताय ॥ ३६॥

त्रिमूर्तयेऽनन्तपरात्ममूर्तये जगन्निवासाय जगन्मयाय ।
नमो ललाटार्पितलोचनाय नमो जनानां हृदि संस्थिताय ॥ ३७॥

फणीन्द्रहाराय नमोऽस्तु तुभ्यं मुनीन्द्रसिद्धार्चितपादपद्म ॥
ऐश्वर्यधर्मासनसंस्थिताय नमः परान्ताय भवोद्भवाय ॥ ३८॥

सहस्रचन्द्रार्कसमूहमूर्तये नमोऽग्निचन्द्रार्कत्रिलोचनाय ।
नमोऽस्तु सोमायनमध्यमाय नमोऽस्तु देवाय हिरण्यबाहवे ॥ ३९॥

नमोऽतिगुह्याय गुहान्तराय वेदान्तविज्ञानविनिश्चिताय ।
त्रिकालहीनामलधामधाम्ने नमो महेशाय नमः शिवाय ॥ ४०॥

स्तवेनानेन भगवान्प्रीतो भूत्वाऽथ भैरवः ।
अवरोह्य च शूलाग्रादुवाच परमेश्वरः ॥ ४१॥

त्वयाऽहं स्तोत्रवर्येण तोपितो दैत्यपुङ्गव ।
प्रीतोऽस्मि तव दास्यामि गाणपत्यं हि दुर्लभम् ॥ ४२॥

नन्दीश्वरसमो वत्स भृङ्गी नाम गणो भव ।
एवं लब्धवरो दैत्यः कोटिसूर्यसमप्रभः ॥ ४३॥

नीलकण्ठस्त्रिनेत्रश्च वृषकेतुर्जटाधरः ।
तं दृष्ट्वा देवताः सर्वा हर्षनिर्भरमानसाः ॥ ४४॥

तुष्टुवुर्गणराजं तं भैरवस्य समीपगम् ।

इति सौरपुराणे एकोनत्रिंशत्यध्यायान्तर्गतं अन्धककृतं
शिवस्तोत्रं सम्पूर्णम् ।

Encoded and proofread by PSA Easwaran

*Andhakakritam Shiva Stotram*

pdf was typeset on December 11, 2021

Please send corrections to *sanskrit@cheerful.com*